श्रीपराशर उवाच ।
"इत्युक्ता प्रणिपत्यैनं ययुर्देवा यथागतम् ।
मायामोहोऽपि तैः सार्द्धं ययौ यत्र महा-
सुराः ॥"

इति विष्णुपुराणे ३ अंशे १७ अध्यायः ॥
मायावती, स्त्री, ( मायास्यास्तीति । माया+मतुप् । मस्य वः । उगित्वात् ङीप् । ) रतिः । कामपत्नी । इति जटाधरः ॥ तस्या नामकारणं यथा,—

श्रीपराशर उवाच ।
"एतस्मिन्नन्तरे प्राप्तः सह तत्रैव नारदः ।
अन्तःपुरचरीं देवीं रुक्मिणीं प्राह हर्षयन् ॥
एष ते तनयः सुभ्रु ! हत्वा शम्बरमागतः ।
हृतो येनाभवद्बालो भवत्याः सूतिकागृहात् ॥
इयं मायावती भार्य्या तनयस्यास्य ते सती ।
शम्बरस्य न भार्य्येयं श्रूयतामत्र कारणम् ॥
मन्मथे तु गते नाशं तदुद्भवपरायणा ।
शम्बरं मोहयामास मायारूपेण रूपिणी ॥
विवाहाद्युपभोगेषु रूपं मायामयं शुभम् ।
दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा ॥"

इति विष्णुपुराणे ५ अंशे २७ अध्यायः ॥
(विद्याधरीविशेषः । यथा, कथासरित्सागरे । ३३ । ३५ ।
"अहं मायावती नाम राजन् ! विद्याधराङ्गना ।
इयन्तं कालमभवं शापदोषेण हस्तिनी ॥"
राजकन्याविशेषः । यथात्रैव । ११२ । ११२ ।
"अभून्मलयसिंहाख्यो राजा राजगृहे पुरा ।
तस्य मायावतीत्यासीद्रूपेणाप्रतिमा सुता ॥")
मायावसिकः, त्रि, ( मायया वसं आच्छादनं करोतीति ठन् । ) परप्रतारकः । इति शब्दमाला ॥ ( मायारसिक इति वा पाठः ॥ )
मायावान्, [ त् ] पुं, ( माया अस्त्यस्य । माया+"अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति पक्षे मतुप् । मस्य वः । ) कंसराजः । इति शब्दरत्नावली ॥ मायायुक्ते, कपटयुक्ते च त्रि । (यथा, ऋग्वेदे । ४ । १६ । ९ ।
"कृतिभिस्तमिषणो द्युम्नहूतौ नि मायावान-
ब्रह्मा दस्युरर्त्त ।"
"मायावान् कपटवान् ।" इति तद्भाष्ये सायणः ॥ )
मायावी, [ न् ] पुं, ( प्रशस्ता मायाकापट्यमस्यास्तीति । माया+"अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ।) मायाकारः । तत्पर्य्यायः । वंसकः २ मायी ३ मायिकः ४ ऐन्द्रजालिकः ५ । इति जटाधरः ॥ (यथा, मार्कण्डेये । २२ । ७ ।
"मायावी दानवः सोऽथ मुनिरूपं समास्थितः ।
स प्राह राजपुत्त्रं तं पूर्व्ववैरमनुस्मरन् ॥")
बिड़ालः । इति राजनिर्घण्टः ॥ ( मोहनशक्तियुक्तः परमात्मा । यथा, पञ्चदश्याम् । ६ । ४ ।
"स्वतश्चिदन्तर्यामी तु मायावी सूक्ष्मदेहितः ।
सूत्रात्मा स्थूलदेहोऽथ विराडित्युच्यते परः ॥")

मायासीता, स्त्री, (मायाकल्पिता सीता ।) योगेन अग्निकृतसीताप्रतिकृतिः । यथा,—

अग्निरुवाच ।
"भगवन् ! श्रूयतां वाक्यं कालेन यदुपस्थितम् ।
सीताहरणकालोऽयं तवैव समुपस्थितः ॥
दैवञ्च दुर्निवार्य्यञ्च न च दैवात् परं बलम् ।
मत्प्रसूं मयि संन्यस्य छाया रक्षान्तिकेऽधुना ॥
दास्यामि सीतां तुभ्यञ्च परीक्षासमये मम ।
देवैः प्रस्थापितोऽहञ्च न च विप्रो हुता-
शनः ॥
रामस्तद्वचनं श्रुत्वा न प्रकाश्य च लक्ष्मणम् ।
स्वीचकार च स्वच्छन्दं हृदयेन विदूयता ॥
वह्निर्योगेन सीताया मायासीतां चकार सः ।
तद्रूपगुणसर्व्वाङ्गां ददौ रामाय नारद ! ॥
सीतां गृहीत्वा स ययौ गोप्यं वक्तुं निषिध्य च ।
लक्ष्मणो नैव बुबुधे गोप्यमन्यस्य का कथा ॥
लङ्कां गत्वा रघुश्रेष्ठो जघान श्रावणेन च ।
सबान्धवं रावणञ्च सीतां संप्राप दुःखिताम् ॥
ताञ्च वह्निपरीक्षाञ्च कारयामास सत्वरम् ।
हुताशस्तत्र काले च वास्तवीं जानकीं ददौ ॥
उवाच छाया वह्निञ्च रामञ्च विनयान्विता ।
करिष्यामीति किमहं तदुपायं वदस्व मे ॥"

वह्निरुवाच ।
"त्वं गच्छ तपसे देवि ! पुष्करञ्च सुपुण्यदम् ।
कृत्वा तपस्यां तत्रैव स्वर्गलक्ष्मीर्भविष्यसि ॥
सा च तद्वचनं श्रुत्वा प्रतप्य पुष्करे तपः ।
दिव्यं त्रिलक्षवर्षञ्च स्वर्गलक्ष्मीर्बभूव ह ॥
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा ।
कामिनी पाण्डवानाञ्च द्रौपदी द्रुपदात्मजा ॥
कृते युगे वेदवती कुशध्वजसुता शुभा ।
त्रेतायां रामपत्नी सा सीतेति जनकात्मजा ॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा ।
त्रिहायणीति सा प्रोक्ता विद्यमाना युगत्रये ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः ॥
मायासुतः, पुं, ( मायायाः मायादेव्याः सुतः । ) बुद्धः । इति हेमचन्द्रः । २ । १५२ ॥
मायिकं, क्ली, ( माया मोहनगुणः विद्यतेऽस्मिन् । माया+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् । ) मायाफलम् । इति राजनिर्घण्टः ॥ ग्रन्थान्तरे मायिका मादका इत्यपि पाठः ॥
मायिकः, पुं, (माया अस्त्यस्य । माया+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् । ) मायाकारः । इति जटाधरः ॥ ( यथा, देवीभागवते । ४ । १९ । ४ ।
"यन्मायामोहितश्चाहं सदा वर्त्ते परात्मनः ।
परवान् दारुपाञ्चाली मायिकस्य यथा वशे ॥"
मायाविशिष्टे, त्रि ॥ )
मायी, [ न् ] पुं, ( मायाऽस्त्यस्य । माया+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ।) मायाकारः । तत्पर्य्यायः । धूर्त्तः २ वञ्चकः ३ वंसकः ४ कुहकः ५ दाम्भिकः ६ जालिकः ७ । इति हेमचन्द्रः । ३ । ४९ ॥
( मायायुक्ते, त्रि । यथा, कुमारे । २ । ४६ ।
"यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ॥"
मायोपाधिके परमेश्वरे च । यथा, पञ्चदश्याम् । ६ । १२३ ।
"मायान्तु प्रकृतिं विद्यान् मायिनन्तु महे-
श्वरम् ॥")
मायुः, पुं, (मिनोति प्रक्षिपति देहे उष्माणमिति । मिञ् प्रक्षेपणे+"कृवापाजिमिस्वदिसाध्यशूभ्य उण् ।" उणा० १ । १ । इति उण् । "मीनाति मिनोतिदीङां ल्यपि च ।" ६ । १ । ५० । इत्यात्वम् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् । ) पित्तम् । इत्यमरः । २ । ६ । ६२ ॥ ( शब्दः । यथा, ऋग्वेदे । १ । १६४ । २८ ।
"सृक्वाणं घर्म्ममभिवावशाना मिमाति मायुं
पयते पयोभिः ॥"
"मायुं शब्दं मिमाति निर्म्माति करोति ।" इति तद्भाष्ये सायणः ॥ वाक् । इति निरुक्ते । १ । ११ ।)
मायुराजः, पुं, कुवेरपुत्त्रः । इति त्रिकाण्डशेषः ॥
मायूरं, क्ली, (मयूराणां समूहः । मयूर+"प्राणिरजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इत्यण् ।) मयूरसमूहः । इत्यमरः । २ । ५ । ४३ ॥ ( मयूराणामिदमित्यण् ।) तत्सम्बन्धिनि, त्रि ॥ यथा, महाभारते । १३ । १०४ । ९० ।
"आजं गव्यं तथा मांसं मायूरञ्चैव वर्ज्जयेत् ॥)
मायूरिकः, पुं, ( मयूरं हन्ति । मयूर+"पक्षिमत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक् । ) मयूरघाती । इति सिद्धान्तकौमुदी ॥
मायूरी, स्त्री, अजमोदा । इति राजनिर्घण्टः ॥
मारः, पुं, ( मृ+भावे घञ् । ) मृतिः । ( यथा, बृहत्संहितायाम् । ३ । २१ ।
"कुम्भारतद्रुघटनिभः खण्डो रूपवा विरो-
धितिर्भयदः ।")
म्रियन्ते प्राणिनोऽनेन । मृ+घञ् । ) कामदेवः । ( यथा, नैषधे । ४ । ७९ ।
"असुममार न मार ! कथं नु सा
रतिरतिप्रथितापि पतिव्रता ।
विरहिणीगणघातनपातकी
दयितयापि तयासि किमुज्झितः ॥")
विघ्नः । इति मेदिनी । रे, ७६ ॥ (मृ+णिच्+घञ् ।) मारणम् । इति हेमचन्द्रः । २ । ३६ ॥ धुस्तूरः । इति शब्दचन्द्रिका ॥ मारगणोत्पत्तिर्यथा,—

मार्कण्डेय उवाच ।
"मनोभवस्य वचनं श्रुत्वाथ चतुराननः ।
विवक्षुरपि तद्वाक्यं श्रुत्वानुत्साहकारकम् ॥
सर्व्वस्य मोहने ब्रह्मा चिन्ताविष्टोऽभवन्नहि ।
समर्थो मोहितुमिति निशश्वास मुहुर्मुहुः ॥
निश्वासमारुतात्तस्य नानारूपा महाबलाः ।
जाता गणा लोलजिह्वा लोलाश्चातिभयङ्कराः ॥
तुरङ्गवदनाः केचित् केचिद्गजमुखास्तथा ।
सिंहव्याघ्रमुखाश्चान्ये श्वखराहखराननाः ॥